Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १६५
फेब्रुआरी - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### मोक्षस्य कथा रमणीया

अस्माकं देशे अल्पज्ञाः संन्यासिनः अपि मोक्षं प्रति यथेच्छं जल्पन्तः दृश्यन्ते । यावत्यः मोक्षकथाः भारते भवन्ति तावत्यः अपरत्र नैव स्युः । 'अहम् आत्मसाक्षात्कारं कृतवान्' इति भ्रमप्रसारकाः स्वामिनः दम्भानन्दाः अपि अत्रैव सदा सुलभाः भवन्ति । समाजस्य अवनतेः कारणं किं स्यात् ? कालिदासः श्रद्दधाति यत् यावत् सूर्यः तपति तावत् अन्धकारः प्रभवितुं न शक्नोति । परन्तु सम्प्रति तथा नास्ति । सूर्ये विद्यमाने सति अन्धकारस्य प्रभावः न क्षीयते । यथा हि अस्माकम् अनवद्या ज्ञानपरम्परा लोके प्रशस्यते । तथापि तया सह एव ईर्ष्या-दारिद्र्य-निन्दा-दुराचार-मालिन्य-हिंसा-प्रमादादीनि अन्धतत्त्वानि अपि नग्नीभूय नृत्यन्ति । भारतमाता सद्गुणानां जननी अस्ति । तत्सत्यं चेत् दुर्गुणानां प्रसूतिः कुतः ?

कोऽपि देशः दम्भस्य आलम्बेन चिरं स्थातुं न शक्नोति । महान् संन्यासी केदारनाथः लिखति यत् हिमालयः वा अर्बुदः वा, गङ्गा वा नर्मदा वा, तीर्थं वा अरण्यं वा आत्मसाक्षात्कारस्य प्रधानम् उपकरणं भवितुं नार्हति । निर्जने क्रियमाणा साधना एव मोक्षाय कल्पते इति सार्वत्रिकः भ्रमः अवनतेः कारणम् अस्ति । ओशो कथयति यत् दुर्मनसः मनुष्याः तु हिमालयस्य शान्तिम् अपि ध्वंसयिष्यन्ति ।

अपि च परिवारे सुष्ठु समाचरन्, परसेवारतः, सङ्कटग्रस्तः अपि सत्पथे दृढं तिष्ठन्, संयतः सज्जनः अपि साक्षात्कारम् अर्हति इति मुग्धः समाजः अङ्गीकर्तुं न शक्नोति । सत्यपूतः सुवर्णकारः वा, ऋजुः कुम्भकारः वा, श्रमजीवी लौहकारः वा, प्रजावत्सलः राजनेता वा मोक्षं प्राप्तुं नार्हति किम् ? मोक्षाय लोकपूजितं दिगम्बरत्वं वा, यशोवर्धनं ब्रह्मचर्यं वा अनिवार्यं ननु ? यदि मनः शङ्कते तर्हि अत्र शास्त्राणां दोषः नास्ति, अस्माकं दर्पणः स्वच्छताम् अपेक्षते ।

द्विविधौ संन्यासिनौ इति कल्पना क्रियताम् । एकः समाजे अतीव आदरं लभते । एषः ईश्वरस्य साक्षात्कारं कृतवान् इति लोकविश्रुतिः । सोऽपि संन्यासी मौनेन अनुमोदनं करोति । अपरः संन्यासी अपि लब्धयशाः एव । परन्तु सः पार्श्वगतान् भक्तान् वदति यत् अहम् इतोऽपि ऋजुतया साधनां करोमि । परन्तु साक्षात्कारात् सुदूरे अस्मि इति स्पष्टम् । मम अभिप्रायेण द्वितीयः संन्यासी विशिष्यते । यतो हि सः भक्तान् वञ्चयते न ।

प्रायः अन्धकारे अटन्तः कपटतापसाः साक्षात्कारं प्रति अधिकं जल्पन्ति । महम्मदः पयगम्बरः पुनः पुनः निवेदयति स्मः – 'अहमपि भवादृशः एव साधारणः मनुष्यः अस्मि ।' एतादृशाः विनम्राः महामानवाः साक्षात्कारस्य मोक्षस्य वा पारपत्रेण (visa) विना अपि ईश्वरेण सह पृथिव्यां रमन्ते ।

# राजश्यालः

राजा महासेनः समग्रं भारतं जित्वा चक्रवर्ती जातः। ततः पराजयं प्राप्तवन्तः राजानः तस्य सामन्तत्वं प्राप्य तदीयान् आदेशान् पालयन्तः नियतरूपेण तस्मै शुल्कं यच्छन्ति स्म। साम्राज्यस्थापनाय महासेनः बहूनि युद्धानि कृतवान्। किन्तु तेन कदापि प्रजाः न पीडिताः। प्रजानां हिताय प्रतिदिनम् उपायं चिन्तयति स्म सः। नूतनाः योजनाः आरचय्य सामन्तानां द्वारा तासां क्रियान्वयनं कारयति स्म सः। अतः महासेनस्य साम्राज्ये सर्वाः प्रजाः सुखेन जीवन्ति स्म। किन्तु कोसलदेशे एव अन्यादृशी स्थितिः दृश्यते स्म। याः योजनाः इतरत्र सफलाः भवन्ति ताः एव कोसले किमर्थं विफलतां यान्ति इति महासेनः अवगन्तुं न शक्तवान्। अतः एतस्य कारणस्य ज्ञानार्थं सः बहुधा प्रयत्नं कृतवान्। किन्तु साफल्यं तु न प्राप्तम्।

चक्रवर्तिनः आस्थाने कश्चन राजपुरोहितः आसीत्। तस्य बन्धुः गुणनिधिनामकः कश्चन सरलः जनः। सः सर्वान् रञ्जयति। महाराजः अपि विरामसमये तम् आनाय्य तस्य मुखात् हास्यप्रसङ्गान् श्रुत्वा मनोविनोदं प्राप्नोति स्म तदा तदा।

गुणनिधिः महादैवभक्तः। सर्वाणि मन्दिराणि द्रष्टव्यानि, महत् पुण्यं च सम्पादनीयम् इति तस्य प्रबला इच्छा। सः श्रुतवान् आसीत् यत् कोसलदेशे प्रतिग्रामं देवालयः अस्ति, दुर्गमे अरण्ये अपि तत्र प्राचीनानि मन्दिराणि सन्ति इति। अतः तीर्थाटनाय सः कोसलदेशं प्रति गतवान्। तस्य यात्रा निर्विघ्नं प्रचलतु इति उद्देशेन राजपुरोहितः योग्यां व्यवस्थां कृतवान्। रथं, कांश्चन सहकारिणः चापि तस्मै सः दत्तवान्। कोसलदेशं गतः गुणनिधिः आदौ रामपुरनामकं ग्रामं गतवान्। तत्र भगवतः नटराजस्य मन्दिरम् आसीत्।

जनैः नटराजाय रमणीयं मन्दिरं निर्मितम् आसीत्। मन्दिरस्य दर्शनमात्रेण एव गुणनिधिः नितरां सन्तुष्टः। मूर्तेः दर्शनात् तस्य मुखात् अप्रयत्नेन एव स्वरः निर्गतः – 'हर हर महादेव' इति। अनन्तरक्षणे एव केचन भटाः आगत्य तं बाहौ गृहीतवन्तः।

एतत् दृष्ट्वा गुणनिधिः आश्चर्यम् अनुभवन् – "किमेतत्? मया कः अपराधः कृतः? किमर्थं मां पीडयन्तः सन्ति भवन्तः?" इति अपृच्छत्। "अत्र मन्दिरस्य अन्तः कोलाहलकरणं निषिद्धम् इति किं भवता न ज्ञायते? आगच्छतु ग्रामप्रमुखसमीपम्। सः एव यथायोग्यं दण्डनं विधास्यति" इति अवदन् भटाः। गुणनिधिः तान् निवेदितवान् यत् अहम् अत्रत्यं नियमं न जानामि स्म, अतः एतं मम प्रथमापराधं मत्वा भवन्तः मां मुञ्चन्तु कृपया इति। किन्तु भटाः एतत् न अङ्गीकृतवन्तः। 'ग्रामप्रमुखसमीपं गच्छाम अविलम्बेन' इति अवदन् ते। गुणनिधिः अनन्यगतिकतया एतत् अङ्गीकृतवान्। कश्चन युवकः एतत्सर्वं पश्यन् आसीत्। सः गुणनिधेः समीपम् आगत्य कर्णे अवदत् – "किमर्थम् एतैः सह विवादः क्रियते? एकैकस्मै एकैकं रूप्यकं ददातु। ते भवन्तं मुञ्चन्ति" इति। गुणनिधिः तथैव कृतवान्। तदा भटाः तं मुक्त्वा ततः निर्गतवन्तः।

तेषां भटानां निर्गमनस्य अनन्तरं गुणनिधिः युवकाय कृतज्ञतां समर्प्य अपृच्छत् – "मन्दिरे भगवतः नाम्नः उच्चारणं कथम् अपराधाय भवेत्?" इति।

तदा युवकः हसन् अवदत् – "एतस्मिन् देशे किं युक्तं, किं च अयुक्तम् इति निर्णयाय न कोऽपि नियमः। कीदृशम् आचरणं कदा अपराधाय भवति इति वयम् अपि न जानीमः। यदा राजभटाः गृह्णन्ति तदा उत्कोचं दत्त्वा आत्मनः मोक्षः सम्पादनीयः इत्येतावत् एव वयं जानीमः। ग्रामप्रमुखस्य समीपं विषयः नीयते चेदपि न किमपि प्रयोजनम्। न्यायान्याय्यं न विचारयति सः" इति। एतत् श्रुत्वा आश्चर्यम् अनुभवन् गुणनिधिः अपृच्छत् – "किं ग्रामप्रमुखः अपि

उत्कोचग्राही एव ? भवन्तः एतम् अंशं राजानं किमर्थं न उक्तवन्तः ?'' इति। ''किं प्रयोजनं भवेत् तेन ? स तु राज्ञः श्यालः खलु अस्ति ?'' इति अवदत् सः तरुणः। गुणनिधिः तं युवकम् अवदत् यत् अहं राजपुरोहितस्य बन्धुः अस्मि इति। तदा युवकः तम् अवदत् – ''एवं तर्हि भवान् ग्रामप्रमुखं स्वपरिचयादिकं सर्वं वदति चेत् प्रायः प्रयाणे भवतः किमपि प्रयोजनं सिद्ध्येत् अपि'' इति। गुणनिधिः ग्रामप्रमुखं स्वस्य परिचयम् अवदत्। तस्मात् तेन किमपि कष्टं न अनुभूतं तस्मिन् ग्रामे। अन्येषु अपि ग्रामेषु तेन एवमेव कृतम्। अतः तदीया तीर्थयात्रा निर्विघ्नं परिसमाप्ता।

तीर्थयात्रापरिणामतः तेन अवगतं यत् रामपुर्याम् इव समग्रे कोसलदेशे अपि राजभटाः लघुनः विषयस्य निमित्तम् अपि सामान्यान् पीडयन्ति, ते प्राप्तस्य उत्कोचस्य कञ्चन भागम् अधिकारिणे यच्छन्ति अपि इति। किन्तु कोऽपि एतम् अंशं राजानं निवेदयितुं न इच्छति स्म। यतः सर्वे ग्रामप्रमुखाः राज्ञः श्यालाः एव आसन्।

प्रतिग्रामं तेन समानं वचनं श्रुतम् – ''किं करवाम, अस्माकं ग्रामस्य प्रमुखः राज्ञः श्यालः अस्ति'' इति। गुणनिधिः तीर्थयात्रां समाप्य प्रत्यागतः अस्ति इति वार्तां श्रुत्वा राजा तं स्वसमीपम् आनायितवान्, यात्राविशेषान् अपृच्छत् च। गुणनिधिः सर्वान् विशेषान् राजानं निवेद्य अन्ते अवदत् – ''कोसलराजः रसिकतागुणेन प्रायः कृष्णम् अपि अतिशेते इति भाति। यतः प्रतिग्रामं तदीयाः श्यालाः सन्ति'' इति। एतत् श्रुत्वा हसन् राजा तम् अपृच्छत् – ''किं भवता तेषां राजश्यालानां गणना न कृता ?'' इति।

''महाराज ! गणना कथं कर्तुं शक्येत ? प्रतिग्रामं राजश्यालः दृश्यते !! राजकार्यनिर्वाहकाः सर्वे तत्र राजश्यालाः एव'' इति अवदत् गुणनिधिः। एतत् श्रुत्वा राजा पुनरपि हसितवान्। गुणनिधिं विविधान् प्रश्नान् पृष्ट्वा सः अवगतवान् यत् सर्वं जनानां मुखात् श्रुतम् एव गुणनिधिः वदन् अस्ति इति। राजा जानाति स्म यत् कोसलराजस्य उभे एव पत्न्यौ इति। तयोः अन्यतरा महासेनस्य भगिनी एव। अतः शतशः श्यालाः कोसलराजस्य भवितुं न अर्हन्ति इति सः अवगतवान्।

गुणनिधेः निर्गमनस्य अनन्तरं राज्ञा चिन्तनं कृतम् – 'मया उत्तमाः योजनाः तु कृताः किन्तु योजनायाः क्रियान्वयनं कुर्वताम् अधिकारिणां योग्यतायाः विषये अधिकम् अवधानं न दत्तम्। कोसलदेशे मम योजनाः विफलाः यत् तत्र कारणं प्रायः तत्रत्याः अधिकारिणः एव' इति। अनन्तरदिने एव सः कोसलदेशं प्रति गुप्तचरान् प्रेषितवान्। ते गुप्तचराः कोसलदेशे सर्वत्र अटित्वा विषयसङ्ग्रहं कृत्वा प्रत्यागत्य राजानं निवेदितवन्तः। ततः ज्ञातं तु एवम् – 'समग्रे कोसलदेशे राजोद्योगिनः सर्वे स्वच्छन्दं जनान् पीडयन्तः सन्ति। अधिकारस्य दुरुपयोगः तत्र सामान्यः विषयः। अधिकारिणां नियुक्तिः तत्र योग्यताम् अवलम्ब्य न क्रियते। कोसलदेशस्य सेनापतिः एव एतस्य प्रत्यक्षम् उदाहरणम्। सः खड्गग्रहणम् अपि सम्यक् न जानाति। शूरता तु नाम्ना एव। सः राज्ञः श्यालः। अतः एव योग्यतायाम् असत्याम् अपि यः राजोद्योगं प्राप्तवान् भवति सः सर्वोऽपि राजश्यालशब्दे निर्दिश्यते तत्र' इति। एतस्य सर्वस्य ज्ञानात् महासेने विवेकः उदितः।

कोसलराजः आवुत्तः इत्यतः योजनानाम् असाफल्यस्य कारणानि यानि कोसलराजेन उक्तानि तेषु एव महासेनेन विश्वसितम् आसीत्, न तु प्रत्यक्षं परिशीलितम् आसीत्। 'मम एतस्य व्यवहारलोपस्य कारणतः कोसलदेशे प्रजानां महती हानिः जाता। सा अचिरात् एव मया सम्यक् करणीया। शासनव्यवहारे राज्ञा सर्वं प्रत्यक्षम् अवगन्तव्यम्। अन्यस्य वचने विश्वासः न करणीयः' इति निश्चितं महासेनेन। तदनन्तरम् अचिरात् एव सः कोसलदेशे अयोग्यान् अधिकारिणः स्थानच्युतान् कृतवान्। अतः अग्रिमेषु द्वित्रेषु एव वर्षेषु कोसलदेशे अपि समृद्धिः दृष्टा। ततः राज्ञा यदा वेषान्तरं धृत्वा तत्र भ्रमणं कृतं तदा जनानां मुखात् श्रुतं यत् अस्माकं ग्रामप्रमुखः राजश्यालः नास्तीत्यतः वयम् इदानीं सुखेन स्म इति।

## नोऽद्वितीयं भारतम्

व्योम शाहः

"भारतम् अर्थात् पृथिव्याः रत्ननिधानम्" उक्तं यवनपर्यटकेन।

"गणिताऽऽयुर्वेद-वाणिज्यानाम् आस्पदं भारतम्" इत्युवाच चीनीय-पान्थः।

"विनयशालिनां विदुषां निवासभूमिः इदं भारतम्" एवमवोचत ताजिक-प्रवासी।

नैषा ह्यस्तनीया वार्ता । आपूर्वभारतम् एतत् सर्वं नवितम् । आगच्छ, अहं भारतीयः भवतः भारत-दर्शनं कारयामि। "स्मरणे लेखने चैव पाठने पठने तथा। विजृम्भ्यते तु तादृक्षं भारतं यद् हविर्गतम्॥" (प्रादुष्करोमि तद् भारतं यद् स्मरणे लेखने पाठने पठने चिन्तने च विस्मृतं व्यामृष्टं च।)

निकोलो डे कोंटी (ईटलीदेशीय-पर्यटकः) भारतं समागत्य प्रमथितः "एते जनाः कथं दिक्-चक्रेण विना समुद्रे विहरन्ति। कथमेकेनैव ध्रुवतारकेन सर्वासु दिक्षु पर्यटन्ति?" अपरः लेगोक्ष ड' फ्लैक्सः भारते स्थित्वा जनजीवनं निरिक्ष्य उदितवान् "भारतीयाः अर्थात् सर्वासां कलानां निबिड-विज्ञानस्य च अन्वेषितारः इति।"

नानृतं वच्मि, वयमस्मिन् एव भारते निवसामः। भारतम् अर्थात् विदुषां भूमिः। अत्र सर्वेऽपि पण्डिताः। यः एनं पठति सोऽपि पण्डितः। भारतीयाः सदा विश्वेभ्यः भिन्नाः आसन्। अखिले विश्वे यदा इष्टिकाः समचतुरस्राः आसन् अतः कूपाः अपि समचतुरस्राः आसन्। किन्तु विचक्षणैः भारतीयैः समलम्बाः इष्टकाः निर्मिताः। प्रमाणमिच्छति? शूल्वसूत्रे उल्लेखः सम्प्राप्यते, अन्विष्यताम्।

"दन्तधावनं कदा कल्पितम्?" "सप्तदशे अष्टादशे वा शतके।" एतादृशं चिन्तनं भवताम्। पञ्चमशतके लिखितायां वराहमिहिरस्य बृहत्संहितायाम् अस्य प्रमाणं विद्यते। सः निर्दिष्टवान् यद् उद्वर्तनं, स्नानार्थं सौगन्धिकं जलं, दन्तधावनं, केशतैलमित्यादयः कथं निर्मेयम्।

अपरं रुच्यं बोधयामि। "हिमं कदा कथञ्च निर्मितम्?" "बाण-वर्ण-गज-ब्रह्मतमे (पञ्चचत्वारिंशदधिकमष्टादशशततमे) (१८४५) वर्षे जोह्न गोर्री हिमङ्करं यन्त्रम् अन्विष्टवान्" इति अवदत् गूगलऋषिः यदा पृष्टः। तस्मात् पूर्वं यदा मोघुलाः भारते शासानाः तदा तेभ्यः हिमम् अतीव अरोचत। नवम्बरमासतः आरभ्य ते अधिभुवं हिमनिर्माणं प्रारभन्त। प्रत्येक-रात्रौ द्वि-त्रिवारं जलं हिमीभवति पश्चात् च तत् हिमगृहे प्रयोजनार्थं संस्थाप्यमानं क्रियते। आवर्षं ते हिमस्य उपयोगं कुर्वन्ति।

एतत्तु आसीत् भौतिकवस्तुनिर्माणस्य कथाबिन्दुः। एतेषां ज्ञानम् अस्माकं पार्श्वे सम्प्राप्यते किन्तु वयं अधिकारपत्रार्थं निवेदनं न कृतवन्तः। 'अहो! अद्भूत-कुटीलता वैज्ञानिकानाम्। शास्त्रे सकृत् न अलेखिष्यत् तर्हि अचलिष्यत् किन्तु अधिकारपत्रम् अवश्यं गृहीतव्यम्'। धिग् एवं विचारयन्तीं मतिं मे च ते च। यदि एवम् अभविष्यत् तर्हि सर्वमेतत् चिरञ्जीवं कथमभविष्यत्?

जानाति वा भारतीयानां मेधाशक्तिः? इदानीम् एव प्रादुष्करोमि... पश्यैताम्...

यवनानां बहुप्रसिद्धः तत्त्वज्ञः गणितज्ञश्च पाईथागोरसः। सर्वेऽपि तं जानन्ति। सः ख्रिस्तस्य पञ्चशताब्दी-पूर्वम् एकं सिद्धान्तं दत्तवान् "अक्षकर्णस्थितस्य समचतुरस्रस्य क्षेत्रम् (तस्य) आधार-रेखा-स्थित-समचतुरस्रयोः क्षेत्रयोः समाहारः स्यात्।" एतस्मात् महाशयात् अपरः पण्डितः भारते अभूत्। ख्रिस्तस्य अष्टशताब्दी-पूर्वम् बोधायनः सूत्रं ददौ "दीर्घ-चतुरश्रस्याक्ष्णया रज्जुः पार्श्वमानी तिर्यग्। मानी च यत् पृथग्भूते कुरुतस्तदुभयं करोति।" अतः पाईथागोरसः यत् सेद्धुम् ऐच्छत् तद् प्रागेव सिद्धमासीत्। खलु व्यर्थप्रयत्नकारकः सः! बोधायनः केवलम् एतस्मिन् न हृष्टः तुष्टश्च। सः अतीव प्रसिद्धां समस्यां "वर्तुलस्य समचतुरश्रीकरणम्" अपि निराकरोत्।

(क्रमशः...)

# मासवार्ता

## सम्पन्नः दशमः पदवीदानसमारम्भः




एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य दशमः पदवीदानसमारम्भः जनवरीमासस्य १८ दिनाङ्के सम्पन्नः। समारम्भेऽस्मिन् 'डिप्लोमा इन संस्कृतटिचिंग' इति अभ्यासक्रमे प्रशिक्षितेभ्यः छात्रेभ्यः श्रीअरुण-ओझामहोदयस्य (वरिष्ठः अधिवक्ता) करकमलाभ्यां पदवीप्रदानम् अभवत्। अभ्यासक्रमोऽयं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन सह संलग्नः वर्तते।

प्रसङ्गेऽस्मिन् "संस्कृतभाषा अस्माकं भारतीयसंस्कृतेः पोषिकास्ति। तस्याः अध्ययनं सर्वैः कर्तव्यम्" इति अवदत् श्रीअरुण-ओझामहोदयः। कार्यक्रमेऽस्मिन् 'डिप्लोमा इन संस्कृतटिचिंग' अभ्यासक्रमस्य सहायकः शिक्षकः श्रीभाविन् पाठकः अपि उपस्थितः आसीत्। प्रसङ्गेऽस्मिन् एकलव्य-संस्कृत-एकेडेमीसंस्थाने आयोजितेषु विविधेषु अभ्यासक्रमेषु संस्कृतस्य अध्ययनं कृतवद्भ्यः छात्रेभ्यः अपि प्रमाणपत्रप्रदानम् अभवत्। प्रमाणपत्रं प्राप्य सर्वे छात्राः सन्तुष्टाः आनन्दिताः च आसन्।

## आरब्धः पाणिनीयसूत्रपाठवर्गः



एकलव्य-संस्कृत-एकेडेमीसंस्थानं संस्कृतभाषायाः प्रचाराय नैकान् प्रकल्पान् सञ्चालयति। संस्कृतभाषायाः प्रचारस्य माध्यमेन संस्कृतशास्त्राणां रक्षणमपि एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य लक्ष्यं वर्तते। एतदर्थं संस्थानेन पाणिनीयसूत्रपाठवर्गस्य आरम्भः कृतः वर्तते। अभ्यासक्रमेऽस्मिन् ४ कक्ष्यातः आरभ्य ८ कक्ष्यायाः छात्राः पाणिनीयसूत्रपाठं पठिष्यन्ति। प्रथमे चक्रे एते छात्राः लघुसिद्धान्तकौमुद्याः सूत्राणि कण्ठस्थीकरिष्यन्ति ततः एते व्याकरणस्य अध्ययनम् अपि कुर्युः इति संस्थानस्य लक्ष्यम् वर्तते।

## कृपया हसन्तु

कश्चन नेता प्रजाः उद्बोधयन् आसीत्-

नेता - उतिष्ठत.... जाग्रत..... स्वस्य पादयोः उपरि उत्थातुं प्रयत्नं कुरुत ।

रमणः - (नेतारम् उद्दिश्य उच्चैः) अहं तु बहुकालात् आरभ्य उत्थातुं प्रयत्नं कुर्वन् अस्मि । किन्तु अयम् आरक्षकः वारं वारं माम् उपावेशयन् अस्ति ।

★ ★ ★ ★ ★

शिक्षकः - (नमनम् उद्दिश्य) तव आङ्ग्लभाषायाः ज्ञानं न्यूनमस्ति अतः अयं पाठः दशवारं लेखितुं प्रदत्तः तुभ्यं मया । किन्तु त्वया तु पञ्चवारम् एव लिखितः । एवं किमर्थम् ?

नमनः - आचार्य ! मम गणितस्य ज्ञानम् अपि न्यूनमस्ति ।

★ ★ ★ ★ ★

पत्नी - (पतिम् उद्दिश्य) भोः स्वामिन् ! आगामिनि मासे आवयोः विवाहतिथिः वर्तते । एतस्मिन् वर्षे आवयोः विवाहतिथेः उत्सवं कथम् आचराव: ?

पतिः - एतस्मिन् वर्षे आदिनं मौनं धृत्वा विवाहतिथेः उत्सवम् आचरितुं मम इच्छा वर्तते ।

★ ★ ★ ★ ★

शिक्षकः - सर्वेण पुत्रेण स्वीयात् पितुः महत्तरेण भवितव्यम् । तादृशं कर्म विधेयं यत् पिता पृष्ठस्थः भवेत्, पुत्रश्च अग्रस्थः भवेदिति ।

छात्रः - अस्तु भगवन् । अहमेवमेव वर्तिष्ये ।

शिक्षकः - तर्हि कथय तावत् त्वं पितुरपि महत्तरः केन प्रकारेण वर्तिस्यसे ।

छात्रः - पिता मे शिरस्त्राणं धारयति अहं 'हेट' धारयिष्यामि । पिता मे भोजनालयं गच्छति अहं 'रेस्टोरा' गमिष्यामि । एवमहं पितुः महत्तरः भविष्यामि ।

## देहि

✍ ओजसी सुखटणकर

कथं याचे बलं देहीति –
स्वीकर्तुं सज्जता नास्ति ।
अतः याचे भक्तिं देहीति –
स्वमर्पितुं त्विच्छा अस्ति ॥

श्रीमात्रा सह कृतः एषः मनसः संवादः (अत्र माता अर्थात् श्रीमाता आनन्दमयी) । वयं यत् किमपि तस्याः याचामहे तत् सा ददाति । परन्तु बहुवारं तया यत् वा यथा दत्तं तत् द्रष्टुम् अस्माकं दृष्टिः स्वयंप्रकाशिता न भवति । तस्याः श्रीमातुः एव कृपया अस्मासु सा दर्शनपात्रता आगच्छति, तदा नूतनं दर्शनं भवति यत् – तया दत्तं स्वीकर्तुं वयम् अक्षमाः स्मः । यथा जीवनार्थं भगवान् अस्मभ्यं बलं ददाति परन्तु तत् स्वीकृत्य जीवने दिनं-प्रतिदिनं कथं तत् उपयोक्तव्यम् इत्यस्मिन् विषये अस्माकं पात्रता न भवति । तर्हि भगवते स्व-अर्पणम् इति एकः सम्यक् उपायः । स्व-अर्पणं कारयित्री भक्तिः यदि तत्समये हृदये न लभ्यते तर्हि साधकेन भक्तेः प्राप्त्यर्थम् अपि भगवन्तं याचना करणीया; इति तु सम्यग्तरः उपायः । स्व-अर्पणेन, भक्त्या प्राप्तं भगवत्सान्निध्यं सर्वासु जीवनपरिस्थितिषु अचलं तिष्ठति । तस्मात् सन्ततं वहत् बलं तु उत्तमात् उत्तमम् एव, खलु ?

## ज्ञानसरिता

**असत्यस्य अभिज्ञातारः**



एषु दिनेषु अपराधप्रवृत्तिः वर्धमाना अस्ति। अतः असत्याभिज्ञानयन्त्रस्य महत्त्वम् अपि वर्धते । केचन पुरुषाः अपि तादृशस्य यन्त्रस्य पात्रं निर्वोढुं शक्नुवन्ति इत्यत्र किं भवन्तः विश्वसन्ति ? नाडीसम्बद्धया समस्यया पीड्यमानाः केचन वस्तुत असत्याभिज्ञाने समर्थाः, यन्त्राणि इव। तादृशानां रोगः निर्दिश्यते 'अफासिया' इति । मस्तिष्कहानेः कारणतः सा स्थितिः प्राप्यते तैः । नाडीशास्त्रतज्ज्ञाः वैद्याः बहून् प्रयोगान् कृत्वा प्रमाणीकृतवन्तः सन्ति यत् अफासियारोगग्रस्ताः असत्याभिज्ञाने विशेषसामर्थ्यवन्तः भवन्ति इति।

मेसेचुसेट्विश्वविद्यालयीयः डॉ. आलिवर्सास्वर्यः एतस्मिन् क्षेत्रे विशेषाध्ययनं विहितवान् अस्ति । सः स्वीये पुस्तके एकां घटनाम् उल्लिखति । कदाचित् अफासियारोगिणः दूरदर्शनं पश्यन्तः आसन् । दूरदर्शनेन राष्ट्राध्यक्षाभ्यर्थिनः भाषणं प्रसार्यते स्म । तेन भाषणकर्त्रा विविधानि आश्वासनानि प्रदत्तानि । तथापि सः दूरदर्शनद्रष्टृणाम् अफासियारोगिणां मनस्सु विश्वासम् उत्पादयितं न शक्तः । अतः तस्य भाषणस्य समाप्तेः अनन्तरं ते श्रोतारः अफासियारोगिणः सर्वे उच्चैः हसितवन्तः।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सम्मुखः** | सामने स्थित | facing |
| **सम्मोहः** | घबराहट | confusion |
| **सरः** | बाण | an arrow |
| **सरधा** | मधुमक्खी | a honey-bee |
| **सरणिः** | क्रम | order |
| **सरभसः** | फुर्तीला | speedy |
| **सर्गः** | सृष्टि | creation |
| **सर्षपः** | सरसों | mustard |
| **सवनम्** | यज्ञ | a sacrificial rite |
| **सस्यम्** | अनाज | corn |
| **सहसा** | अचानक | suddenly |
| **सहस्त्रम्** | हज़ार | a thousand |
| **सहायः** | साथी | a companion |
| **सहिष्णुः** | सहनशील | forbearing |
| **सहेलः** | विनोदप्रियः | playful |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कः 'दोहे' 'पद'' साखियाँ'इत्येतेषां रचयिता वर्तते ?**

(क) रहीमः (ख) कबीरदासः (ग) तुलसीदासः (घ) सूरदासः

**२ ) एतेषु कः'प्रहेलिका''मुकरियां'इत्यनयोः रचयिता वर्तते ?**

(क) रैदासः (ख) दादूदयालः (ग) खुसरो (घ) मलूकदासः

**३ ) 'मदनाष्टक'' शृङ्गार सोरठा''नायिका भेद'इत्येतेषां रचयिता कः वर्तते ?**

(क) तुलसीदासः (ख) जायसी (ग) रहीमदासः (घ) केशवदासः

**४ ) प्रसिद्धग्रन्थस्य राधेश्यामरामायणस्य रचयिता कः अस्ति ?**

(क) राधेश्यामशर्मा (ख) राधेश्यामः (ग) पं. राधेश्यामः (घ) राधेश्यामः शुक्लः

**५ ) उडियामहाभारतस्य रचयिता कः वर्तते ?**

(क) अनन्तदासः (ख) सरलादासः (ग) चण्डीदासः (घ) कृष्णदासः

**६ ) उडियारामायणस्य रचयिता कः अस्ति ?**

(क) सरलादासः (ख) जगन्नाथदासः (ग) बलरामदासः (घ) भक्तचरणदासः

**७ ) उडियाभाषायां भागवतपुराणस्य रचना केन कृतासीत् ?**

(क) सरलादासेन (ख) चण्डीदासेन (ग) अच्युतानन्ददासेन (घ) जगन्नाथदासेन

उत्तराणि – (१) ख (२) ग (३) ग (४) ग (५) ख (६) ग (९) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## संस्कृत-सम्भाषण-वर्गः
### ( प्रथमः स्तरः )

**Date :** 02/03/20 to 29/05/20
**Day :** Mon-Wed-Fri
**Time :** 6:30 am to 8:00 am
**Fees :** 4000/-

- **Venue :** Eklavya Sanskrit Academy Core House, Nr Parimal Garden, Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

**Value Education Through Sanskrit**

## बालसंस्कारकेन्द्रम्
**(Class SKg to 4)**

## बालसंस्कृतवर्गः
**(Class 5 to 8)**

**Date** : 13/06/20 to 10/04/21
**Day** : Saturday
**Time** : 5.30pm to 7.00pm
**Fees** : 5000/-

- **Venue :** Eklavya Sanskrit Academy Core House, , Nr Parimal Garden, Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006